# Devadibhih Kritam Garuda Stotram

# देवादिभिः कृतं गरुडस्तोत्रम्

## Document Information

Text title : Devadibhih Kritam Garuda Stotram

File name : devAdibhiHkRRitaMgaruDastotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Adiparva | adhyAya 20/10-14||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# देवादिभिः कृतं गरुडस्तोत्रम्

त्वमृषिस्त्वं महाभागस्त्वं देवः पतगेश्वरः ।
त्वं प्रभुस्तपनप्रख्यस्त्वं नस्त्राणमनुत्तमम् ॥ १०॥

बलोर्मिमान्साधुरदीनसत्त्वः समृद्धिमान्दुष्प्रसहस्त्वमेव ।
तपः श्रुतं सर्वमहीनकीर्ते अनागतं चोपगतं च सर्वम् ॥ ११॥

त्वमुत्तमः सर्वमिदं चराचरं गभस्तिभिर्भानुरिवावभाससे ।
समाक्षिपन्भानुमतः प्रभां मुहु स्त्वमन्तकः सर्वमिदं ध्रुवाध्रुवम् ॥ १२॥

दिवाकरः परिकुपितो यथा दहे त्प्रजास्तथा दहसि हुताशनप्रभ ।
भयङ्करः प्रलय इवाग्निरुत्थितो विनाशयन्युगपरिवर्तनान्तकृत् ॥ १३॥

खगेश्वरं शरणमुपस्थिता वयं महौजसं वितिमिरमभ्रगोचरम् ।
महाबलं गरुडमुपेत्य खेचरं परावरं वरदमजय्यविक्रमम् ॥ १४॥

एवं स्तुतः सुपर्णस्तु देवैः सर्षिगणैस्तदा ।
तेजसः प्रतिसंहारमात्मनः स चकार ह ॥ १५॥

इति महाभारते आदिपर्वणि २० अध्यायान्तर्गतं
देवादिभिः कृतं गरुडस्तोत्रं सम्पूर्णम् ।

महाभारत । आदिपर्व । अध्याय २०/१०-१४॥

mahAbhArata . Adiparva . adhyAya 20/10-14..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*